
# पञ्चदशः पाठः  मानवताधर्मः । (सरलार्थलेखनार्थम्)

कलियुगेऽस्मिन् सर्वत्र विविधधर्माणां प्रचारः भवति इति दृश्यते। किन्तु, 'धर्मः' इति सङ्कल्पनायाः कः अर्थः इति चेत् यः धारयति सः धर्मः। स्वकर्तव्यस्य पालनं नाम धर्मः । यथा - राजधर्मः, पितृधर्मः, कन्याधर्मः, पतिधर्मः, पत्नीधर्मः इत्यादयः ।

यदि मानवः सर्वत्र शान्तिम् इच्छति, विवादं युद्धं च त्यक्तुम् इच्छति तर्हि तेन मानवताधर्म एव पालनीयः । सर्वे धर्माः मानवताहितवादिनः एव । अतः मानवता सर्वधर्माणां मूलम् । स मानवताधर्म एव अत्र वर्णितः अस्ति **म. म. डॉ. देवीप्रसाद खरवण्डीकरमहाभागैः** ।

- मानवता नाम किम् ?
- मानवताधर्मम् अनुसृत्य सामाजिककार्यं कुर्वतां जनानां नामानि कथयत ।



यथैव सकला नद्यः प्रविशन्ति महोदधिम्।
तथा मानवताधर्मं सर्वे धर्माः समाश्रिताः ।।१।।

षड्जमूला यथा सर्वे सङ्गीते विविधाः स्वराः ।
तथा मानवताधर्मं सर्वे धर्माः समाश्रिताः ।।२।।

एकीभूय यथा सर्वे वर्णा गच्छन्ति शुक्लताम् ।
तथा सम्भूय शंसन्ति धर्मा मानवतागुणम् ।।३।।

सर्वं व्याप्नोति सलिलं शर्करा लवणं यथा ।
एवं मानवताधर्मो धर्मान् व्याप्नोति सर्वथा ।।४।।

यथा प्रकाशयत्येको भानुर्भुवनमण्डलम् ।
धर्मान् प्रकाशयत्येकस्तथा मानवतागुणः ।।५।।

आत्मौपम्यं समाश्रित्य मानवो मानवैः सह ।
यदा व्यवहरेल्लोके तदा मानवता भवेत् ।।६।।

सर्वधर्मान् परित्यज्य भज मानवतां ध्रुवम् ।
एषोऽभ्युदयकृत् पन्थाः तथा श्रेयस्करोऽपि च ।।७।।

## भाषाभ्यासः 

### १. पूर्णवाक्येन उत्तरं लिखत।

अ) सकला नद्यः कं प्रविशन्ति ?
आ) सङ्गीते स्वराः कीदृशाः ?
इ) कः सर्वधर्मान् व्याप्नोति ?
ई) भानुः कं प्रकाशयति ?
उ) कां भज इति कविः वदति ?

### २. सन्धिविग्रहं कुरुत ।

अ) भानुर्भुवनमण्डलम् = ______ + भुवनमण्डलम् ।
आ) प्रकाशयत्येकस्तथा = ______ + ______ + तथा ।
इ) व्यवहरेल्लोके = ______ + लोके ।
ई) एषोऽभ्युदयकृत् = एषः + ______ ।

## ३. पाठात् ल्यबन्त–अव्ययानि चित्वा लिखत

## ४. सूचनानुसारं कृती: कुरुत

अ) सर्वधर्मान् परित्यज्य ध्रुवं मानवतां भज । (पूर्वकालवाचकं निष्कासयत।)

आ) नद्य: महोदधिं प्रविशन्ति । (कर्तृपदम् एकवचने परिवर्तयत ।)

इ) त्वं सर्वधर्मान् परित्यज्य मानवतां भज । ('त्वं' स्थाने 'भवान्' योजयत ।)

ई) सर्वे धर्मा: मानवतागुणं शंसन्ति । (कर्मवाच्ये परिवर्तयत ।)

उ) भानु: भुवनमण्डलं प्रकाशयति । (णिजन्तं निष्कासयत ।)

## ५. समानार्थकशब्दमेलनं कुरुत

| | | | | |
|---|---|---|---|---|
| (१) सरि | (२) रङ्ग: | (३) अ | (४) दिनकृत् | (५) मार्ग: |
| (अ) वण | (आ) भानु: | (इ) नदी | (ई) पन्था: | (उ) सलि |

## ६. माध्यमभाषया उत्तरं लिखत।

अ) मानवताधर्म: अभ्युदयकृत् कथं वर्तते ?

आ) कदा मानवता भवेत् ?

इ) सर्वे धर्मा: मानवताधर्मं समाश्रिता: इति सोदाहरणं स्पष्टीकुरुत।

## ७. विशेष्यै: रिक्तस्थानानि पूरयत ।

सर्वे — ________

श्रेयस्कर: — ________

सकला: — ________

षड्जमूला: — ________

## ८. क्रियापदतालिकां पूरयत

| ए.व. | द्विव. | ब.व. | पुरुष: | लकार: |
|---|---|---|---|---|
| नर्तिष्यति | ________ | ________ | प्रथम: | लृट् |
| ________ | दिशेथे | ________ | मध्यम: | लट् |
| ________ | ________ | अमिलाम | उत्तम: | लङ् |

## ९. नामतालिकां पूरयत

| ए.व. | द्विव. | ब.व. | विभक्ति: |
|---|---|---|---|
| ________ | ऋत्विग्भ्याम् | ________ | तृतीया |
| ________ | ________ | स्रग्भ्य: | चतुर्थी |
| दिशि | ________ | ________ | सप्तमी |

| ए.व. | द्विव. | ब.व. | विभक्ति: |
|---|---|---|---|
| ________ | ________ | योगिषु | सप्तमी |
| ________ | श्रेष्ठिनौ | ________ | प्रथमा |
| धाम्ना | ________ | ________ | तृतीया |

75FTF1